# बृहदारण्यकोपनिषत्

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते

ॐ शान्तिः शान्तिः शान्तिः

ud√ac I P.– поднимать, выталкивать, продолжать, выступать;
ā√dā III Ā. – получать, брать (себе), вынимать;
ava√śiṣ VII P. – оставлять;
śānti *f* - мир; покой, успокоение; тишина;

## अध्याय १

## प्रथममश्वमेधब्राह्मणम्

उषा वा अश्वस्य मेध्यस्य शिरः ।

medhya – чистый (в религ.смысле), пригодный для жертвоприношения;

सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माश्वस्य मेध्यस्य ।

vyātta – широко раскрытый; *n* пасть, глотка;
ātman *m* – *здесь* тело;

द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवान्तरदिशः पर्शव ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो मांसानि ।

pājasya *n* – область живота (у животного), бока; Шанкара – pādāsana-sthanam (ноги)
avāntara – промежуточный, лежащий в середине;
parśu *f* – ребро;
parvan *n* – лунный день; сочленение;
pratiṣṭhā *f* – местоположение, основание, опора; нога, ступня;
nabhas *n* – облака, воздушное пространство, небо;

ऊवध्यं सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमानि ।

ūvadhya, ūbadhya *n* – непереваренная трава в желудке или кишечнике (животного, убитого во время жертвоприношения);
sikatā *f* – песок;
gudā *f* - кишки;
yakṛt *n* – печень;
kloman *m, n* – правое лёгкое;

उद्यन् पूर्वार्धो निम्लोचञ्जघनार्धः ।

ni√mluc, ni√mruc I P. – заходить, садиться (о солнце);
jaghana *m* – задняя часть; зад;

यद्विजृम्भते तद्विद्योतते । यद्विधूनुते तत्स्तनयति ।

vi√jṛmbh I Ā. – раскрывать рот; зевать;
vi√dhū V U. – трясти, колебать;
√stanaya *caus.* – греметь;

यन्मेहति तद्वर्षति । वागेवास्य वाक् ॥ १.१.१ ॥

√mih I P. – поливать, орошать; мочиться;

अहर्वा अश्वं पुरस्तान्महिमान्वजायत । तस्य पूर्वे समुद्रे योनिः ।

mahiman *m* – величие; название сосудов для жертвенных возлияний, использовавшихся во время ащвамедхи. Золотой сосуд ставился впереди коня, серебрянный – сзади.

रात्रिरेनं पश्चान्महिमान्वजायत । तस्यापरे समुद्रे योनिर् ।

yoni *f* – лоно, матка; родина, происхождение, источник;

एतौ वा अश्वं महिमानावभितः सम्बभूवतुः ।

हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वासुरानश्वो मनुष्यान् ।

arvan – бегущий, быстрый; *m* конь;

समुद्र एवास्य बन्धुः समुद्रो योनिः ॥ १.१.२ ॥

इति प्रथमाध्याये प्रथममश्वमेधब्राह्मणम् ॥ १ ॥

## द्वितीयमग्निब्राह्मणम्

नैवेह किं चनाग्र आसीत् ।

मृत्युनैवेदमावृतमासीदशनायया । अशनाया हि मृत्युः ।

aśanāyā *f* - голод;

तन्मनोऽकुरुतात्मन्वी स्यामिति ।

manas √kar VIII U. - решаться на ч.-л.; намереваться сделать ч.-л.;

सोऽर्चन्नचरत् । तस्यार्चत आपोऽजायन्त ।

√arc I P. – сиять, восхвалять;

अर्चते वै मे कमभूदिति । तदेवार्क्यस्यार्कत्वम् ।

arka *m* – луч, солнце, огонь; гимн, песнопение;

कं ह वा अस्मै भवति य एवमेतदर्क्यस्यार्कत्वं वेद ॥ १.२.१ ॥

ka *n* - радость;

आपो वा अर्कः ।

तद्यदपां शर आसीत्तत्समहन्यत । सा पृथिव्यभवत् ।

śaras *n* – пенка, сливки;
saṃ√han II P. - связывать, складывать вместе;

तस्यामश्राम्यत् । तस्य श्रान्तस्य तप्तस्य तेजोरसो निरवर्ततताग्निः ॥ १.२.२ ॥

nir√vart I Ā. – возрастать, подниматься;

स त्रेधात्मानं व्यकुरुतादित्यं तृतीयं वायुं तृतीयम् ।

स एष प्राणस्त्रेधाविहितः ।

तस्य प्राची दिक्शिरोऽसौ चासौ चेर्मौ ।

īrma *m* – рука, передняя лапа у животного;

अथास्य प्रतीची दिक्पुच्छमसौ चासौ च सक्थ्यौ ।

दक्षिणा चोदीची च पार्श्वे । द्यौः पृष्ठमन्तरिक्षमुदरमियमुरः ।

स एषोऽप्सु प्रतिष्ठितः ।

यत्र क्व चैति तदेव प्रतितिष्ठत्येवं विद्वान् ॥ १.२.३ ॥

सोऽकामयत द्वितीयो म आत्मा जायेतेति ।

स मनसा वाचं मिथुनं समभवदशनाया मृत्युः ।

तद्यद्रेत आसीत्स संवत्सरोऽभवत् ।

retas *n* – семя;

न ह पुरा ततः संवत्सर आस ।

तमेतावन्तं कालमबिभर्यावान्त्संवत्सरः ।

तमेतावतः कालस्य परस्तादसृजत ।

तं जातमभिव्याददात् । स भाणकरोत् । सैव वागभवत् ॥ १.२.४ ॥

parastāt *adv.* – далеко от ч.-л. (+Gen.);
abhivyā√dā III P. – открыть рот, чтобы проглотить (+Acc.);
bhāṇ *ij.* - имитация шума дыхания;

स ऐक्षत यदि वा इममभिमंस्ये कनीयोऽन्नं करिष्य इति ।

abhi√man IV Ā. – думать; желать; угрожать, убивать;

स तया वाचा तेनात्मनेदं सर्वमसृजत यदिदं किञ्च ऋचो यजूंषि सामानि छन्दांसि यज्ञान् प्रजां पशून् ।

स यद्यदेवासृजत तत्तदत्तुमध्रियत ।

√dhar *pass.* – продолжать жить, оставаться в живых; начинать, решать, предпринимать;

सर्वं वा अत्तीति तददितेरदितित्वम् ।

aditi – свободный, бесконечный, неисчерпаемый; *f* свобода, безопасность, безграничность;

सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेद ॥ १.२.५ ॥

सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति ।

सोऽश्राम्यत् । स तपोऽतप्यत ।

तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत् ।

प्राणा वै यशो वीर्यम् ।

तत्प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमध्रियत ।

√śvi IV P. (aor. aśvat) – разбухать, пухнуть, квеличиваться в объеме;

तस्य शरीर एव मन आसीत् ॥ १.२.६ ॥

सोऽकामयत मेध्यं म इदं स्यादात्मन्व्यनेन स्यामिति । ततोऽश्वः समभवत् ।

यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम् ।

एष ह वा अश्वमेधं वेद य एनमेवं वेद ।

तमनवरुध्यैवामन्यत । तं संवत्सरस्य परस्तादात्मन आलभत ।

ā√labh I Ā. - приносить в жертву;

पशून् देवताभ्यः प्रत्यौहत् ।

praty√ūh I U. – направлять, указывать; предложить, подарить;

तस्मात्सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्ते ।

एष वा अश्वमेधो य एष तपति । तस्य संवत्सर आत्मा ।

अयमग्निरर्कः । तस्येमे लोका आत्मानः ।

तावेतावर्काश्वमेधौ । सो पुनरेकैव देवता भवति मृत्युरेव ।

अप पुनर्मृत्युं जयति । नैनं मृत्युराप्नोति ।

apa√ji I U. – отгонять, держаться в стороне от ч.-л.;

मृत्युरस्यात्मा भवति । { सर्वमायुरेति । }

एतासां देवतानामेको भवति ॥ १.२.७ ॥

इति प्रथमाध्याये द्वितीयमग्निब्राह्मणम् ॥२॥

## तृतीयमुद्गीथब्राह्मणम्

द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुराः ।

त एषु लोकेष्वस्पर्धन्त ।

√spardh I Ā. – бороться за ч.-л. (+Loc.); состязаться, соперничать;

ते ह देवा ऊचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति ॥१.३.१ ॥

udgītha *m, n* – пение жрецом гимнов Самаведы;
ati√i I P. – проходить, преодолевать;

ते ह वाचमूचुस्त्वं न उद्गायेति । तथेति तेभ्यो वागुदगायत् ।

यो वाचि भोगस्तं देवेभ्य आगायत् । यत्कल्याणं वदति तदात्मने ।

kalyāṇa – красивый, добрый, хороший, благоприятный, счастливый;

तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति ।

udgātar *m* – жрец, поющий гимны Самаведы;

तमभिद्रुत्य पाप्मनाविध्यन् ।

abhi√dru I – бежать, спешить, бросаться в (+Acc.);

स यः स पाप्मा यदेवेदमप्रतिरूपं वदति । स एव स पाप्मा ॥ १.३.२ ॥

pratirūpa - похожий, соответствующий, красивый; *n* картина, образ; подделка, фальшь, обман;

अथ ह प्राणमूचुस्त्वं न उद्गायेति । तथेति तेभ्यः प्राण उदगायत् ।

यः प्राणे भोगस्तं देवेभ्य आगायत् । यत्कल्याणं जिघ्रति तदात्मने ।

√ghrā III P. - обонять;

तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति ।

तमभिद्रुत्य पाप्मनाविध्यन् ।

स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति । स एव स पाप्मा ॥ १.३.३ ॥

अथ ह चक्षुरूचुस्त्वं न उद्गायेति । तथेति तेभ्यश्चक्षुरुदगायत् ।

यश्चक्षुषि भोगस्तं देवेभ्य आगायत् । यत्कल्याणं पश्यति तदात्मने ।

तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति ।

तमभिद्रुत्य पाप्मनाविध्यन् ।

स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति । स एव स पाप्मा ॥ १.३.४ ॥

अथ ह श्रोत्रमूचुस्त्वं न उद्गायेति । तथेति तेभ्यः श्रोत्रमुदगायत् ।

यः श्रोत्रे भोगस्तं देवेभ्य आगायत् । यत्कल्याणं श‍ृणोति तदात्मने ।

तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति ।

तमभिद्रुत्य पाप्मनाविध्यन् ।

स यः स पाप्मा । यदेवेदमप्रतिरूपं श‍ृणोति । स एव स पाप्मा ॥ १.३.५ ॥

अथ ह मन ऊचुस्त्वं न उद्गायेति । तथेति तेभ्यो मन उदगायत् ।

यो मनसि भोगस्तं देवेभ्य आगायत् । यत्कल्याणं संकल्पयति तदात्मने ।

तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति ।

तमभिद्रुत्य पाप्मनाविध्यन् ।

स यः स पाप्मा । यदेवेदमप्रतिरूपं संकल्पयति । स एव स पाप्मा ।

एवमु खल्वेता देवताः पाप्मभिरुपासृजन् । एवमेनाः पाप्मनाविध्यन् ॥ १.३.६ ॥

upa√sarj VI P. – наказывать, мучить; поражать, сокрушать;

अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति । तथेति तेभ्य एष प्राण उदगायत् ।

āsanya – находящийся во рту;

तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति ।

तमभिद्रुत्य पाप्मनाविव्यत्सन् ।

स यथाश्मानमृत्वा लोष्टो विध्वंसेतैवं हैव विध्वंसमाना विष्वञ्चो विनेशुः ।

aśman *m* - камень;
loṣṭa *m, n* – ком (земли);
vi√dhvaṃs I Ā. – распадаться на части, разрушаться, гибнуть;

ततो देवा अभवन् परासुरा । भवत्यात्मना परास्य द्विषन् भ्रातृव्यो भवति य एवं वेद ॥ १.३.७ ॥

parā√bhū I P. – побеждать, одолевать;
bhrātrvya *m* – двоюродный брат; враг, соперник;

ते होचुः क्व नु सोऽभूद्यो न इत्थमसक्तेति । अयमास्येऽन्तरिति ।

asaktar – не связывающий, не привязывающий;

सोऽयास्य आङ्गिरसोऽङ्गानां हि रसः ॥ १.३.८ ॥

ayāsya – Аясья, имя мудреца;
āṅgirasa *patron.* – принадлежащее мудрецу Ангирасу;

सा वा एषा देवता दूर्नाम । दूरं ह्यस्या मृत्युर् ।

दूरं ह वा अस्मान्मृत्युर्भवति य एवं वेद ॥ १.३.९ ॥

सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्य यत्रासां दिशामन्तस्तद्गमयां चकार ।

तदासां पाप्मनो विन्यदधात् ।

vini√dhā III U. – положить, разместить, распределить;

तस्मान्न जनमियान्नान्तमियान्नेत्पाप्मानं मृत्युमन्ववायानीति ॥ १.३.१० ॥

anvava√i II P. – следовать, подойти, войти;

सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्याथैना मृत्युमत्यवहत् ॥ १.३.११ ॥

ati√vah I P. - переводить через ч.-л. (+Acc.);

सा वै वाचमेव प्रथमामत्यवहत् । सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत् ।

सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥ १.३.१२ ॥

pareṇa = parastāt;

अथ प्राणमत्यवहत् । स यदा मृत्युमत्यमुच्यत स वायुरभवत् ।

सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ॥ १.३.१३ ॥

अथ चक्षुरत्यवहत् । तद्यदा मृत्युमत्यमुच्यत स आदित्योऽभवत् ।

सोऽसावादित्यः परेण मृत्युमतिक्रान्तस्तपति ॥ १.३.१४ ॥

अथ श्रोत्रमत्यवहत् । तद्यदा मृत्युमत्यमुच्यत ता दिशोऽभवन् ।

ता इमा दिशः परेण मृत्युमतिक्रान्ताः ॥ १.३.१५ ॥

अथ मनोऽत्यवहत् । तद्यदा मृत्युमत्यमुच्यत स चन्द्रमा अभवत् ।

सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भाति ।

एवं ह वा एनमेषा देवता मृत्युमतिवहति य एवं वेद ॥ १.३.१६ ॥

अथात्मनेऽन्नाद्यमागायत् ।

यद्धि किञ्चान्नमद्यतेऽनेनैव तदद्यते । इह प्रतितिष्ठति ॥ १.३.१७ ॥

ते देवा अब्रुवन् । एतावद्वा इदं सर्वं यदन्नम् । तदात्मन आगासीः ।

अनु नोऽस्मिन्नन्न आभजस्वेति । ते वै माभिसंविशतेति । तथेति तं समन्तं परिण्यविशन्त ।

anvā√bhaj I U. - давать к.-л. долю;

तस्माद्यदनेनान्नमत्ति तेनैतास्तृप्यन्ति ।

एवं ह वा एनं स्वा अभिसंविशन्ति भर्ता स्वानां श्रेष्ठः पुर एता भवत्यन्नादोऽधिपतिर्य एवं वेद ।

य उ हैवंविदं स्वेषु प्रतिर्बुभूषति न हैवालं भार्येभ्यो भवति ।

bubhūrṣati – des. от √bhar;

अथ य एवैतमनुभवति यो वैतमनु भार्यान् बुभूर्षति स हैवालं भार्येभ्यो भवति ॥ १.३.१८ ॥

सोऽयास्य आङ्गिरसोऽङ्गानां हि रसः ।

प्राणो वा अङ्गानां रसः । प्राणो हि वा अङ्गानां रसः ।

तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति तदेव तच्छुष्यति ।

एष हि वा अङ्गानां रसः ॥ १.३.१९ ॥

एष उ एव बृहस्पतिः । वाग्वै बृहती ।

तस्या एष पतिस्तस्मादु बृहस्पतिः ॥ १.३.२० ॥

एष उ एव ब्रह्मणस्पतिः । वाग्वै ब्रह्म ।

तस्या एष पतिस्तस्मादु ब्रह्मणस्पतिः ॥ १.३.२१ ॥

एष उ एव साम । वाग्वै सामैष सा चामश्चेति तत्साम्नः सामत्वम् ।

ama *m* – натиск, напор, сила;

यद्वेव समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव साम ।

pluṣi *m* – белый летающий муравей;
maśaka *m* – комар, мошка;

अश्नुते साम्नः सायुज्यं सलोकताम् । य एवमेतत्साम वेद ॥ १.३.२२ ॥

एष उ वा उद्गीथः । प्राणो वा उत्प्राणेन हीदं सर्वमुत्तब्धम् ।

ut√tambh (ud√stambh) V P., IX P., I Ā. – поддерживать;

वागेव गीथा । उच्च गीथा चेति । स उद्गीथः ॥ १.३.२३ ॥

gīthā *f* – священное песнопение;

तद्धापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षयन्नुवाच ।

brahmadatta caikitaneya – *nom.pr.*

अयं त्वस्य राजा मूर्धानं विपातयताद्यदितोऽयास्य आङ्गिरसोऽन्येनोदगायदिति ।

vi√pātaya *caus.* - заставить разлететься, расколоться, отрубить (голову); сразить, убить;

वाचा च ह्येव स प्राणेन चोदगायदिति ॥ १.३.२४ ॥

तस्य हैतस्य साम्नो यः स्वं वेद भवति हास्य स्वम् ।

sva *n* – собственность, богатство;

तस्य वै स्वर एव स्वम् ।

तस्मादार्त्विज्यं करिष्यन् वाचि स्वरमिच्छेत ।

ārtvijya *n* – должность жреца, обязанности жреца;

तया वाचा स्वरसम्पन्नयार्त्विज्यं कुर्यात् ।

तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एव । अथो यस्य स्वं भवति ।

भवति हास्य स्वं य एवमेतत्साम्नः स्वं वेद ॥ १.३.२५ ॥

तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णम् । तस्य वै स्वर एव सुवर्णम् ।

suvarṇa *n* – золото; правильное произношение звуков;

भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद ॥ १.३.२६ ॥

तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति । तस्य वै वागेव प्रतिष्ठा ।

वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयते । अन्न इत्यु हैक आहुः ॥ १.३.२७ ॥

अथातः पवमानानामेवाभ्यारोहः ।

pavamāna – очищающий; *m* ветер, хавлебный гимн;
abhyāroha *m* – восхождение, рост; молитва;

स वै खलु प्रस्तोता साम प्रस्तौति । स यत्र प्रस्तुयात्तदेतानि जपेत् ।

prastotar *m* – помошник удгатара, поющий вступление самана;

असतो मा सद्गमय

तमसो मा ज्योतिर्गमय

मृत्योर्मामृतं गमयेति ।

स यदाहासतो मा सद्गमयेति । मृत्युर्वा असत्सदमृतं

मृत्योर्मामृतं गमयामृतं मा कुर्वित्येवैतदाह ।

तमसो मा ज्योतिर्गमयेति । मृत्युर्वै तमो ज्योतिरमृतं

मृत्योर्मामृतं गमयामृतं मा कुर्वित्येवैतदाह ।

मृत्योर्मामृतं गमयेति । नात्र तिरोहितमिवास्ति ।

अथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत् ।

तस्मादु तेषु वरं वृणीत । यं कामं कामयेत्तम् ।

स एष एवंविदुद्गातात्मने वा यजमानाय वा यं कामं कामयते तमागायति । तद्धैतल्लोकजिदेव ।

न हैवालोक्यताया आशास्ति य एवमेतत्साम वेद ॥ १.३.२८ ॥

alokyatā *f* – потеря другого мира;

इति प्रथमाध्याये तृतीयमुद्गीथब्राह्मणम् ॥ ३ ॥

## चतुर्थं सृष्ट्यादिसर्वात्मताब्राह्मणम्

ātmatā *f* – сущность;

आत्मैवेदमग्र आसीत्पुरुषविधः ।

सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत् ।

anuvīkṣ (anuvi√īkṣ) I Ā. - оглядываться;

सोऽहमस्मीत्यग्रे व्याहरत् । ततोऽहंनामाभवत् ।

तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र उक्त्वाथान्यन्नाम प्रब्रूते यदस्य भवति ।

स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान् पाप्मन औषत्तस्मात्पुरुषः ।

√uṣ I P. – жечь, сгорать;

ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद ॥ १.४.१ ॥

सोऽबिभेत्तस्मादेकाकी बिभेति ।

स हायमीक्षां चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति ।

तत एवास्य भयं वीयाय । कस्माद्ध्यभेष्यत् ।

द्वितीयाद्वै भयं भवति ॥ १.४.२ ॥

स वै नैव रेमे । तस्मादेकाकी न रमते । स द्वितीयमैच्छत् ।

स हैतावानास यथा स्त्रीपुमांसौ सम्परिष्वक्तौ ।

sampari√ṣvaj I Ā. – обнимать;

स इममेवात्मानं द्वेधापातयत् । ततः पतिश्च पत्नी चाभवताम् ।

तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यः ।

bṛgala *n* - кусочки, обломки;

तस्मादयमाकाशः स्त्रिया पूर्यत एव ।

तां समभवत् । ततो मनुष्या अजायन्त ॥ १.४.३ ॥

सा हेयमीक्षां चक्रे कथं नु मात्मन एव जनयित्वा सम्भवति । हन्त तिरोऽसानीति ।

सा गौरभवदृषभ इतरः । तां समेवाभवत् । ततो गावोऽजायन्त ।

वडवेतराभवदश्ववृष इतरः । गर्दभीतरा गर्दभ इतरः ।

तां समेवाभवत् । तत एकशफमजायत ।

śapha *m* – копыто, лапа, коготь;

अजेतराभवद्बस्त इतरः । अविरितरा मेष इतरः ।

तां समेवाभवत् । ततोऽजावयो ऽजायन्त ।

एवमेव यदिदं किञ्च मिथुनमा पिपीलिकाभ्यस्तत्सर्वमसृजत ॥ १.४.४ ॥

pipīlaka *m* – муравей;

सोऽवेदहं वाव सृष्टिरस्म्यहं हीदं सर्वमसृक्षीति ।

ततः सृष्टिरभवत् । सृष्ट्यां हास्यैतस्यां भवति य एवं वेद ॥ १.४.५ ॥

अथेत्यभ्यमन्थत् । स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत ।

abhi√manth IX P. – пахтать или тереть (для получения огня);

तस्मादेतदुभयमलोमकमन्तरतः । अलोमका हि योनिरन्तरतः ।

तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिः । एष उ ह्येव सर्वे देवाः ।

अथ यत्किञ्चेदमार्द्रं तद्रेतसोऽसृजत । तदु सोम ।

एतावद्वा इदं सर्वमन्नं चैवान्नादश्च । सोम एवान्नमग्निरन्नादः ।

सैषा ब्रह्मणोऽतिसृष्टिः । यच्छ्रेयसो देवानसृजताथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टिर् ।

अतिसृष्ट्यां हास्यैतस्यां भवति य एवं वेद ॥ १.४.६ ॥

तद्धेदं तर्ह्यव्याकृतमासीत् ।

avyākṛta – необособленный, неотделенный;

तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदंरूप इति ।

vyā√kar VIII U. – разделять, делить; объяснять;

तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियत असौ नामायमिदंरूप इति ।

स एष इह प्रविष्ट आ नखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वम्भरो वा विश्वम्भरकुलाये ।

kṣura *m* – нож, бритва;
kṣuradhāna *n* - чехол, футляр;

kulāya *m, n* – ткань, футляр; гнездо, дом;

तं न पश्यन्ति । अकृत्स्नो हि सः प्राणन्नेव प्राणो नाम भवति ।

वदन् वाक्पश्यंश्चक्षुः शृण्वञ्छ्रोत्रं मन्वानो मनः ।

तान्यस्यैतानि कर्मनामान्येव । स योऽत एकैकमुपास्ते न स वेद ।

अकृत्स्नो ह्येषोऽत एकैकेन भवति ।

आत्मेत्येवोपासीत । अत्र ह्येते सर्व एकं भवन्ति ।

तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा । अनेन ह्येतत्सर्वं वेद ।

padanīya p.n. – то, что следует искать;

यथा ह वै पदेनानुविन्देदेवं कीर्तिं (श्लोकं) विन्दते य एवं वेद ॥ १.४.७ ॥

तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा ।

स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रोत्स्यतीतीश्वरो ह तथैव स्यात् ।

आत्मानमेव प्रियमुपासीत ।

स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ॥ १.४.८ ॥

pramāyuka – подверженный разрушению, тленный, смертный;

तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते ।

किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ॥ १.४.९ ॥

ब्रह्म वा इदमग्र आसीत् । तदात्मानमेवावेत् । अहं ब्रह्मास्मीति ।

तस्मात्तत्सर्वमभवत् । तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत् ।

तथर्षीनाम् । तथा मनुष्याणाम् ।

तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति ।

vāmadeva *m nom.pr.*

prati√pad IV Ā. – достигать, получать; узнавать, понимать;

तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति ।

तस्य ह न देवाश्चनाभूत्या ईशते । आत्मा ह्येषां स भवति ।

अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद ।

यथा पशुरेवं स देवानाम् ।

यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान् भुनक्ति ।

एकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किमु बहुषु ।

तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ॥ १.४.१० ॥

ब्रह्म वा इदमग्र आसीदेकमेव । तदेकं सन्न व्यभवत् ।

vi√bhū I P. – возникать, появляться, расширяться;

तच्छ्रेयो रूपमत्यसृजत क्षत्रं, यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति ।

kṣatra *n* власть, могущество, сила, вторая варна – кшатрии; *m* кшатрий, воин;

तस्मात्क्षत्रात्परं नास्ति ।

तस्माद्ब्राह्मणः क्षत्रियं अधस्तादुपास्ते राजसूये ।

rājasūya *m* - большое жертвоприношение, которое совершалось при восхождении царя на престол;

क्षत्र एव तद्यशो दधाति । सैषा क्षत्रस्य योनिर्यद्ब्रह्म ।

तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिम् ।

upani√śri I P. – идти рядом, прислоняться, находить прибежище;

य उ एनं हिनस्ति स्वां स योनिमृच्छति ।

स पापीयान् भवति यथा श्रेयांसं हिंसित्वा ॥ १.४.११ ॥

स नैव व्यभवत् । स विशमसृजत ।

viś *f* – место жительства; племя, народ; третья каста – вайшьи;

यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वे देवा मरुत इति ॥ १.४.१२ ॥

स नैव व्यभवत् । स शौद्रं वर्णमसृजत पूषणम् ।

इयं वै पूषा । इयं हीदं सर्वं पुष्यति यदिदं किञ्च ॥ १.४.१३ ॥

स नैव व्यभवत् । तच्छ्रेयो रूपमत्यसृजत धर्मम् ।

तदेतत्क्षत्रस्य क्षत्रं यद्धर्मः । तस्माद्धर्मात्परं नास्ति ।

अथो अबलीयान् बलीयांसमाशंसते धर्मेण । यथा राज्ञैवम् ।

ā√śaṃs I U. - надеяться, ожидать; бороться за ч.-л.;

यो वै स धर्मः सत्यं वै तत् । तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति ।

धर्मं वा वदन्तं सत्यं वदतीति । एतद्ध्येवैतदुभयं भवति ॥ १.४.१४ ॥

तदेतद्ब्रह्म क्षत्रं विड्शूद्रः ।

तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियः वैश्येन वैश्यः शूद्रेण शूद्रः ।

तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येषु । एताभ्यां हि रूपाभ्यां ब्रह्माभवत् ।

अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाननूक्तोऽन्यद्वा कर्माकृतम् ।

ananūkta - не прочитанный, не выученный;

यदि ह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एव ।

आत्मानमेव लोकमुपासीत । स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते ।

अस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते ॥ १.४.१५ ॥

अथो अयं वा आत्मा सर्वेषां भूतानां लोकः ।

स यज्जुहोति यद्यजते तेन देवानां लोकः ।

अथ यदनुब्रूते तेन ऋषीणाम् ।

अथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छते तेन पितृणाम् ।

ni√par IX P. – положить, предложить подношение предкам;

अथ यन्मनुष्यान् वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणाम् ।

अथ यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनाम् ।

यदस्य गृहेषु श्वापदा वयांस्या पिपीलिकाभ्य उपजीवन्ति तेन तेषां लोकः ।

यथा ह वै स्वाय लोकायारिष्टिमिच्छेत् । एवं हैवंविदे सर्वदा सर्वाणि भूतान्यरिष्टिमिच्छन्ति ।

ariṣṭi *f* – безопасность;

तद्वा एतद्विदितं मीमांसितम् ॥ १.४.१६ ॥

आत्मैवेदमग्र आसीदेक एव ।

सोऽकामयत जाया मे स्यादथ प्रजायेय ।

अथ वित्तं मे स्यादथ कर्म कुर्वीयेति ।

एतावान् वै कामः । नेच्छंश्चनातो भूयो विन्देत् ।

तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति ।

स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते ।

तस्यो कृत्स्नता । मन एवास्यात्मा । वाग्जाया । प्राणः प्रजा ।

चक्षुर्मानुषं वित्तम् । चक्षुषा हि तद्विन्दते ।

श्रोत्रं दैवम् । श्रोत्रेण हि तच्छृणोति ।

आत्मैवास्य कर्म । आत्मना हि कर्म करोति ।

स एष पाङ्क्तो यज्ञः । पाङ्क्तः पशुः । पाङ्क्तः पुरुषः ।

pāṅkta – состоящий из пяти частей;

पाङ्क्तमिदं सर्वं यदिदं किञ्च ।

तदिदं सर्वमाप्नोति य एवं वेद ॥ १.४.१७ ॥

इति प्रथमाध्याये चतुर्थं सृष्ट्यादिसर्वात्मताब्राह्मणम् ॥४॥

## पञ्चमं सप्तान्नब्राह्मणम्

यत्सप्तान्नानि मेधया तपसाजनयत्पिता ।

medhā *f* - мудрость, ум, проницательность, мысль;

एकमस्य साधारणं द्वे देवानभाजयत् ।

sādhāraṇa – имеющий одну основу, общий для всех, универсальный, подобный;
√bhājaya *caus.* – делить, распределять; принимать участие в ч.-л.;

त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् ।

तस्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न ।

कस्मात्तानि न क्षीयन्ते अद्यमानानि सर्वदा ।

यो वै तामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन ।

pratīka – идущий вперед, смотрящий вперед; *n* рот;

स देवानपिगच्छति स ऊर्जमुपजीवति । इति श्लोकाः ॥ १.५.१ ॥

ūrja - сильный, могучий; *m* сила, мощь;

यत्सप्तान्नानि मेधया तपसाजनयत्पितेति ।

मेधया हि तपसाजनयत्पितैकमस्य साधारणमिति ।

इदमेवास्य तत्साधारणमन्नं यदिदमद्यते ।

स य एतदुपास्ते न स पाप्मनो व्यावर्तते । मिश्रं ह्येतत् ।

vyā√vart I Ā. – отделяться от, поворачиваться;

द्वे देवानभाजयदिति । हुतं च प्रहुतं च ।

prahuta - пожертвованный; *n* жертвенная пища;

तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वति ।

अथो आहुर्दर्शपूर्णमासाविति ।

darśa *m* - новолуние;

तस्मान्नेष्टियाजुकः स्यात् ।

iṣṭi *f* – жертвоприношение, состоящее из масла, фруктов, противоположное жертвоприношению животных или сомы;

पशुभ्य एकं प्रायच्छदिति । तत्पयः ।

पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति ।

तस्मात्कुमारं जातं घृतं वैवाग्रे प्रतिलेहयन्ति स्तनं वानुधापयन्ति ।

अथ वत्सं जातमाहुरतृणादिति ।

तस्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति ।

पयसि हीदं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न ।

तद्यदिदमाहुः संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति । न तथा विद्यात् ।

यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं विद्वान् ।

©cc-by-nc-sa 2004-2025 Н.П.Лихушина


सर्वं हि देवेभ्योऽन्नाद्यं प्रयच्छति ।

कस्मात्तानि न क्षीयन्ते अद्यमानानि सर्वदेति । पुरुषो वा अक्षितिः ।

स हीदमन्नं पुनः पुनर्जनयते ।

यो वैतामक्षितिं वेदेति । पुरुषो वा अक्षितिः ।

स हीदमन्नं धियाधिया जनयते कर्मभिः ।

यद्धैतन्न कुर्यात्क्षीयेत ह ।

सोऽन्नमत्ति प्रतीकेनेति । मुखं प्रतीकं मुखेनेत्येतत् ।

स देवानपिगच्छति स ऊर्जमुपजीवतीति प्रशंसा ॥ १.५.२ ॥

त्रीण्यात्मनेऽकुरुतेति मनो वाचं प्राणं तान्यात्मनेऽकुरुत ।

अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति ।

कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव ।

vicikitsā *f* – сомнение, неуверенность;
bhī *f* – страх, боязнь;

तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति ।

यः कश्च शब्दो वागेव सा । एषा ह्यन्तमायत्तैषा हि न ।

प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एव ।

एतन्मयो वा अयमात्मा । वाङ्मयो मनोमयः प्राणमयः ॥ १.५.३ ॥

त्रयो लोका एत एव । वागेवायं लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ॥ १.५.४ ॥

त्रयो वेदा एत एव । वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ॥ १.५.५ ॥

देवा पितरो मनुष्या एत एव । वागेव देवा मनः पितरः प्राणो मानुष्याः ॥ १.५.६ ॥

पिता माता प्रजैत एव । मन एव पिता वाङ्माता प्राणः प्रजा ॥ १.५.७ ॥

विज्ञातं विजिज्ञास्यमविज्ञातमेत एव ।

यत्किञ्च विज्ञातं वाचस्तद्रूपम् । वाग्घि विज्ञाता ।

वागेनं तद्भूत्वावति ॥ १.५.८ ॥

यत्किञ्च विजिज्ञास्यं मनसस्तद्रूपम् ।

मनो हि विजिज्ञास्यम् । मन एनं तद्भूत्वावति ॥ १.५.९ ॥

यत्किञ्चाविज्ञातं प्राणस्य तद्रूपम् ।

प्राणो ह्यविज्ञातः । प्राण एनं तद्भूत्वावति ॥ १.५.१० ॥

तस्यै वाचः पृथिवी शरीरम् । ज्योतीरूपमयमग्निः ।

तद्यावत्येव वाक्तावती पृथिवी तावानयमग्निः ॥ १.५.११ ॥

अथैतस्य मनसो द्यौः शरीरम् । ज्योतीरूपमसावादित्यः ।

तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यः ।

तौ मिथुनं समैताम् । ततः प्राणोऽजायत ।

स इन्द्रः । स एषोऽसपत्नः । द्वितीयो वै सपत्नः ।

sapatna *m* – соперник, противник, враг;

नास्य सपत्नो भवति य एवं वेद ॥ १.५.१२ ॥

अथैतस्य प्राणस्यापः शरीरम् । ज्योतीरूपमसौ चन्द्रः ।

तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रः ।

त एते सर्व एव समाः सर्वेऽनन्ताः ।

स यो हैतानन्तवत उपास्तेऽन्तवन्तं स लोकं जयति ।

अथ यो हैताननन्तानुपास्तेऽनन्तं स लोकं जयति ॥ १.५.१३ ॥

स एष संवत्सरः प्रजापतिष्षोडशकलः ।

तस्य रात्रय एव पञ्चदश कला । ध्रुवैवास्य षोडशी कला ।

स रात्रिभिरेवा च पूर्यतेऽप च क्षीयते ।

सोऽमावास्यां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते ।

तस्मादेतां रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥ १.५.१४ ॥

kṛkalāsa *m* – ящерица, хамелеон;
apaciti *f* – вознаграждение, возмездие;

यो वै स संवत्सरः प्रजापतिः षोडशकालोऽयमेव स योऽयमेवंवित्पुरुषः ।

तस्य वित्तमेव पञ्चदश कलाः । आत्मैवास्य षोडशी कला ।

स वित्तेनैवा च पूर्यतेऽप च क्षीयते ।

तदेतन्नभ्यं यदयमात्मा । प्रधिर्वित्तम् ।

nabhya *n* – ступица (колеса);
pradhi *m* – обод колеса, диск луны;

तस्माद्यद्यपि सर्वज्यानिं जीयत आत्मना चेज्जीवति प्रधिनागादित्येवाहुः ॥ १.५.१५ ॥

jyāni *n* – притеснение, угнетение;

अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति ।

सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा ।

कर्मणा पितृलोकः । विद्यया देवलोकः ।

देवलोको वै लोकानां श्रेष्ठः । तस्माद्विद्यां प्रशंसन्ति ॥ १.५.१६ ॥

अथातः सम्प्रत्तिः । यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति ।

saṃpratti *f* – вручение, отказ, передача;

स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति ।

यद्वै किञ्चानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता ।

ये वै के च यज्ञास्तेषां सर्वेषां यज्ञ इत्येकता ।

ये वै के च लोकास्तेषां सर्वेषां लोक इत्येकता । एतावद्वा इदं सर्वम् ।

एतन्मा सर्वं सन्नयमितो भुनजदिति ।

तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः । तस्मादेनमनुशासति ।

lokya – дающий свободу деятельности, помогающий достичь лучший мир; обычный, настоящий, действительный;

स यदैवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति ।

स यद्यनेन किञ्चिदक्षणया कृतं भवति तस्मादेनं सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम ।

adakṣṇayā *adv.* – поперек, неправильно;

स पुत्रेणैवास्मिल्लोके प्रतितिष्ठति ।

अथैनमेते देवाः प्राणा अमृता आविशन्ति ॥ १.५.१७ ॥

पृथिव्यै चैनमग्नेश्च दैवी वागाविशति ।

सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥ १.५.१८ ॥

दिवश्चैनमादित्याच्च दैवं मन आविशति ।

तद्वै दैवं मनो येनानन्द्येव भवत्यथो न शोचति ॥ १.५.१९ ॥

अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति ।

स वै दैवः प्राणो यः संचरंश्चासंचरंश्च न व्यथतेऽथो न रिष्यति ।

√vyath I Ā. – дрожать, волноваться, страшиться, быть удрученным;
√riṣ (I P. reṣati; IV P. riṣyati) быть поврежденным, разрушенным; причинять (боль, вред);

स एष एवंवित्सर्वेषां भूतानामात्मा भवति । यथैषा देवतैवं सः ।

यथैतां देवतां सर्वाणि भूतान्यवन्त्येवं हैवंविदं सर्वाणि भूतान्यवन्ति ।

√av I P. – способствовать, насыщать, защищать, любить;

यदु किंचेमाः प्रजाः शोचन्त्यमैवासां तद्भवति ।

amā *adv.* - дома, домой; у себя;

पुण्यमेवामुं गच्छति । न ह वै देवान् पापं गच्छति ॥ १.५.२० ॥

अथातो व्रतमीमांसा ।

प्रजापतिर्ह कर्माणि ससृजे । तानि सृष्टान्यन्योऽन्येनास्पर्धन्त ।

वदिष्याम्येवाहमिति वाग्दध्रे । द्रक्ष्याम्यहमिति चक्षुः ।

श्रोष्याम्यहमिति श्रोत्रम् । एवमन्यानि कर्माणि यथाकर्मम् ।

तानि मृत्युः श्रमो भूत्वोपयेमे । तान्याप्नोत् ।

upa√yam I U. – брать себе, получать, присваивать; жениться;

तान्याप्त्वा मृत्युरवारुन्द्ध ।

तस्माच्छ्राम्यत्येव वाक् । श्राम्यति चक्षुः । श्राम्यति श्रोत्रम् ।

अथेममेव नाप्नोत्योऽयं मध्यमः प्राणः । तानि ज्ञातुं दध्रिरे ।

अयं वै नः श्रेष्ठो यः संचरंश्चासंचरंश्च न व्यथतेऽथो न रिष्यति ।

हन्तास्यैव सर्वे रूपं भवामेति । त एतस्यैव सर्वे रूपमभवन् ।

तस्मादेत एतेनाख्यायन्ते प्राणा इति ।

तेन ह वाव तत्कुलमाचक्षते यस्मिन्कुले भवति य एवं वेद ।

य उ हैवंविदा स्पर्धतेऽनुशुष्यति ।

अनुशुष्य हैवान्ततो म्रियत इत्यध्यात्मम् ॥ १.५.२१ ॥

अथाधिदेवतम् । ज्वलिष्याम्येवाहमित्यग्निर्दध्रे ।

तप्स्याम्यहमित्यादित्यः । भास्याम्यहमिति चन्द्रमाः ।

एवमन्या देवता यथादेवतम् ।

स यथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुः ।

म्लोचन्ति ह्यन्या देवता न वायुः ।

√mluc (mruc) I P. – идти, заходить;

सैषानस्तमिता देवता यद्वायुः ॥ १.५.२२ ॥

अथैष श्लोको भवति

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति ।

प्राणाद्वा एष उदेति प्राणेऽस्तमेति ।

तं देवाश्चक्रिरे धर्मं स एवाद्य स उ श्व इति ।

यद्वा एतेऽमुर्ह्यध्रियन्त तदेवाप्यद्य कुर्वन्ति ।

amurhi *adv.* – в то время, тогда;

तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च ।

नेन्मा पाप्मा मृत्युराप्नवदिति ।

यद्यु चरेत्समापिपयिषेत्तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति ॥ १.५.२३ ॥

इति प्रथमाध्याये पञ्चमं सप्तान्नब्राह्मणम् ॥५॥

## षष्ठमुक्थब्राह्मणम्

uktha *n* – хвала, хвалебный гимн; призыв, обращение; вид рецитации стихов в ритуале;

त्रयं वा इदं नाम रूपं कर्म ।

तेषां नाम्नां वागित्येतदेषामुक्थम् । अतो हि सर्वाणि नामान्युत्तिष्ठन्ति ।

एतदेषां साम । एतद्धि सर्वैर्नामभिः समम् ।

एतदेषां ब्रह्म । एतद्धि सर्वाणि नामानि बिभर्ति ॥ १.६.१ ॥

अथ रूपाणां चक्षुरित्येतदेषामुक्थम् । अतो हि सर्वाणि रूपाण्युत्तिष्ठन्ति ।

एतदेषां साम । एतद्धि सर्वै रूपैः समम् ।

एतदेषां ब्रह्म । एतद्धि सर्वाणि रूपाणि बिभर्ति ॥ १.६.२ ॥

अथ कर्मणामात्मेत्येतदेषामुक्थम् । अतो हि सर्वाणि कर्माण्युत्तिष्ठन्ति ।

एतदेषां साम । एतद्धि सर्वैः कर्मभिः समम् ।

एतदेषां ब्रह्म । एतद्धि सर्वाणि कर्माणि बिभर्ति ।

तदेतत्त्रयं सदेकमयमात्मा । आत्मो एकः सन्नेतत्त्रयम् ।

तदेतदमृतं सत्येन छन्नम् । प्राणो वा अमृतम् । नामरूपे सत्यम् ।

ताभ्यामयं प्राणश्छन्नः ॥ १.६.३ ॥

इति प्रथमाध्याये षष्ठमुक्थब्राह्मणम् ॥ ६॥

## अध्याय २

### प्रथममजातशत्रुब्राह्मणम्

दृप्तबालाकिर्हानूचानो गार्ग्य आस ।

anu√vac II P. – учить;
dṛptabālāki, gārgya – *nom. pr.;*

स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति ।

ajātaśatru – *nom. pr.;*

स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मः जनको जनक इति वै जना धावन्तीति ॥ २.१.१ ॥

स होवाच गार्ग्यः य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुर् मा मैतस्मिन्संवदिष्ठाः ।

अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा अहमेतमुपास इति ।

स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति ॥ २.१.२ ॥

स होवाच गार्ग्यः य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुः मा मैतस्मिन्संवदिष्ठाः ।

बृहन्पाण्दरवासाः सोमो राजेति वा अहमेतमुपास इति ।

pāṇḍara - бледно-желтый, беловатый;

स य एतमेवमुपास्तेऽहरहर्सुतः प्रसुतो भवति । नास्यान्नं क्षीयते ॥ २.१.३ ॥

स होवाच गार्ग्यः य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुः मा मैतस्मिन्संवदिष्ठाः ।

तेजस्वीति वा अहमेतमुपास इति ।

स य एतमेवमुपास्ते तेजस्वी ह भवति । तेजस्विनी हास्य प्रजा भवति ॥ २.१.४ ॥

स होवाच गार्ग्यः य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुः मा मैतस्मिन् संवदिष्ठाः ।

पूर्णमप्रवर्तीति वा अहमेतमुपास इति ।

स य एतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नास्यास्माल्लोकात्प्रजोद्वर्तते ॥ २.१.५ ॥

ud√vart I Ā. - пропадать, исчезать;

स होवाच गार्ग्यः य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुः मा मैतस्मिन्संवदिष्ठाः ।

इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति ।

vaikuṇṭha – Владыка Викунтхи, *эпитет Вишну, Индры*;

स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ॥ २.१.६ ॥

anyatastya *m* – соперник, враг;

स होवाच गार्ग्यः य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुः मा मैतस्मिन्संवदिष्ठाः ।

विषासहिरिति वा अहमेतमुपास इति ।

viṣāsahi – осиливающий, подчиняющий (+Gen.);

स य एतमेवमुपास्ते विषासहिर्ह भवति । विषासहिर्हास्य प्रजा भवति ॥ २.१.७ ॥

स होवाच गार्ग्यः य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुः मा मैतस्मिन्संवदिष्ठाः ।

प्रतिरूप इति वा अहमेतमुपास इति ।

स य एतमेवमुपास्ते प्रतिरूपं हैवैनमुपगच्छति नाप्रतिरूपम् ।

अथो प्रतिरुपोऽस्माज्जायते ॥ २.१.८ ॥

स होवाच गार्ग्यः य एवायमादर्शे पुरुष एतमेवाहं ब्रह्मोपास इति ।

ādarśa *m* – зеркало, отражение;

स होवाचाजातशत्रुः मा मैतस्मिन् संवदिष्ठाः ।

रोचिष्णुरिति वा अहमेतमुपास इति ।

rociṣṇu – блистающий, сияющий;

स य एतमेवमुपास्ते रोचिष्णुर्ह भवति । रोचिष्णुर्हास्य प्रजा भवति ।

अथो यैः संनिगच्छति । सर्वांस्तानतिरोचते ॥ २.१.९ ॥

ati√ruc I Ā. - сиять над, превосходить в блеске (+Acc.);

स होवाच गार्ग्यः य एवायं यन्तं पश्चाच्छन्दोऽनूदेत्येतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुः मा मैतस्मिन् संवदिष्ठाः ।

असुरिति वा अहमेतमुपास इति ।

स य एतमेवमुपास्ते सर्वं हैवास्मिंल्लोक आयुरेति ।

नैनं पुरा कालात्प्राणो जहाति ॥ २.१.१० ॥

स होवाच गार्ग्यः य एवायं दिक्षु पुरुष एतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुः मा मैतस्मिन्संवदिष्ठाः ।

द्वितीयोऽनपग इति वा अहमेतमुपास इति ।

स य एतमेवमुपास्ते द्वितीयवान्ह भवति । नास्माद्गणश्छिद्यते ॥ २.१.११ ॥

स होवाच गार्ग्यः य एवायं छायामयः पुरुष एतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुः मा मैतस्मिन्संवदिष्ठाः ।

मृत्युरिति वा अहमेतमुपास इति ।

स य एतमेवमुपास्ते सर्वं हैवास्मिंल्लोक आयुरेति ।

नैनं पुरा कालान्मृत्युरागच्छति ॥ २.१.१२ ॥

स होवाच गार्ग्यः य एवायमात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति ।

स होवाचाजातशत्रुः मा मैतस्मिन् संवदिष्ठाः ।

आत्मन्वीति वा अहमेतमुपास इति ।

स य एतमेवमुपास्त आत्मन्वी ह भवति । आत्मन्विनी हास्य प्रजा भवति ।

स ह तूष्णीमास गार्ग्यः ॥ २.१.१३ ॥

स होवाचाजातशत्रुः एतावन्नू३ इति । एतावद्धीति । नैतावता विदितं भवतीति ।

स होवाच गार्ग्यः उप त्वायानीति ॥ २.१.१४ ॥

स होवाचाजातशत्रुः प्रतिलोमं चैतद्यद्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे वक्ष्यतीति । व्येव त्वा ज्ञपयिष्यामीति ।

pratiloma – против шерсти; противоестественный, неблагоприятный, несвойственный касте;

तं पाणावादायोत्तस्थौ । तौ ह पुरुषं सुप्तमाजग्मतुः ।

तमेतैर्नामभिरामन्त्रयां चक्रे बृहन् पाण्दरवासः सोम राजन्निति ।

स नोत्तस्थौ । तं पाणिनापेषं बोधयां चकार । स होत्तस्थौ ॥ २.१.१५ ॥

स होवाचाजातशत्रुः यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागादिति ।

तदु ह न मेने गार्ग्यः ॥ २.१.१६ ॥

स होवाचाजातशत्रुः यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते ।

तानि यदा गृह्णाति । अथ हैतत्पुरुषः स्वपिति नाम ।

तद्गृहीत एव प्राणो भवति । गृहीता वाग् गृहीतं चक्षुर् गृहीतं श्रोत्रम् गृहीतं मनः ॥ २.१.१७ ॥

स यत्रैतत्स्वप्न्यया चरति ते हास्य लोकाः ।

svapnyayā *adv.* – во сне;

तदुतेव महाराजो भवत्युतेव महाब्राह्मणः । उतेवोच्चावचं निगच्छति ।

uccāvaca – разнообразный;

स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तेतैवमेवैष एतत्प्राणान् गृहीत्वा

स्वे शरीरे यथाकामं परिवर्तते ॥ २.१.१८ ॥

अथ यदा सुषुप्तो भवति । यदा न कस्य चन वेद ।

हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ।

nāḍī *f* - трубка, канал; вена, жила; пульс;
purītat *m, n* – околосердечная сумка, перикард; внутренности;
abhipra√sthā I U. – начинать, продвигаться, достигать; превосходить;

ताभिः प्रत्यवसृप्य पुरीतति शेते ।

pratyava√sarp I P. – ползти навстречу;

स यथा कुमारो वा महाराजो वा महाब्राह्मणो वातिघ्नीमानन्दस्य गत्वा शयीत । एवमेवैष एतच्छेते ॥ २.१.१९ ॥

atighnī *f* – полное забвение или глубокий сон, стирающий все неприятное в прошлом и считающийся высшим состоянием блаженства;

स यथोर्णवाभिस्तन्तुनोच्चरेद्यथा अग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि

भूतानि व्युच्चरन्ति ।

ūrṇavant *m* – паук;
tantu *m* – нить, струна;
uc√car I P. – подниматься, всходить;
viṣphuliṅga *m* – искра;

तस्योपनिषत्सत्यस्य सत्यमिति । प्राणा वै सत्यं तेषामेष सत्यम् ॥ २.१.२० ॥

इति द्वितीयाध्याये प्रथममजातशत्रुब्राह्मणम् ॥ १ ॥

## द्वितीयं ब्राह्मणम्

यो ह वै शिशुं साधानं सप्रत्याधानं सस्थूणं सदामं वेद सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि ।

ādhāna *n* – место отдыха; сосуд, ёмкость;
pratyādhāna *n* – место для хранения ч.-л.;
sthūṇa *n* – столб, колонна;
dāma *n* – лента, шнур;

अयं वाव शिशुर्योऽयं मध्यमः प्राणः । तस्येदमेवाधानमिदं प्रत्याधानं प्राणः स्थूणान्नं दाम ॥ २.२.१ ॥

तमेताः सप्ताक्षितय उपतिष्ठन्ते ।

akṣiti - неразрушимый, неувядаемый;

तद्या इमा अक्षंल्लोहिन्यो राजयस्ताभिरेनं रुद्रोऽन्वायत्तः ।

lohita (*f* lohinī) – красный;
anvāyatta – связанный, находящийся в соответствии;

अथ या अक्षन्नापस्ताभिः पर्जन्यः । या कनीनका तयादित्यः ।

kanīnaka *m* – зрачок;

यत्कृष्णं तेनाग्निर् । यच्छुक्लं तेनेन्द्रः । अधरयैनं वर्तन्या पृथिव्यन्वायत्ता । द्यौरुत्तरया ।

vartani *f* – ресницы;

नास्यान्नं क्षीयते य एवं वेद ॥ २.२.२ ॥

तदेष श्लोको भवति

अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपम् ।

camasa *m* – кубок, ковш;

तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति ।

saṃ√vid II U. – знать, воспринимать, чувствовать; согласиться, одобрить; находиться вместе с к.-л.;

अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति । इदं तच्छरीर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः ।

तस्मिन्यशो निहितं विश्वरूपमिति । प्राणा वै यशो विश्वरूपम् । प्राणानेतदाह ।

तस्यासत ऋषयः सप्त तीर इति । प्राणा वा ऋषयः । प्राणाणेतदाह ।

वागष्टमी ब्रह्मणा संविदानेति । वाग्घ्यष्टमी ब्रह्मणा संवित्ते ॥ २.२.३ ॥

इमावेव गोतमभरद्वाजौ । अयमेव गोतमोऽयं भरद्वाजः ।

gotama, bharadvāja - *nom.pr.* имена мудрецов;

इमावेव विश्वामित्रजमदग्नी । अयमेव विश्वामित्रोऽयं जमदग्निः ।

viśvāmitra, jamadagni - *nom.pr.* имена мудрецов;

इमावेव वसिष्ठकश्यपौ । अयमेव वसिष्ठोऽयं कश्यपः ।

vasiṣṭha, kaśyapa - *nom.pr.* имена мудрецов;

वागेवात्रिः । वाचा ह्यन्नमद्यते ।

atri *m* – поедатель; *nom.pr.* имя мудреца;

अत्तिर्ह वै नामैतद्यदत्रिरिति ।

atti *m* – поедатель;

सर्वस्यात्ता भवति । सर्वमस्यान्नं भवति य एवं वेद ॥ २.२.४ ॥

इति द्वितीयं ब्राह्मणम् ॥२॥

द्वे वाव ब्रह्मणो रूपे । मूर्तं चैवामूर्तं च ।

मर्त्यं चामृतं च । स्थितं च यच्च । सच्च त्यं च ॥ २.३.१ ॥

tyam – этимологически часть слова satyam;

तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्च । एतन्मर्त्यम् । एतत्स्थितम् । एतत्सत् ।

तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति । सतो ह्येष रसः ॥ २.३.२ ॥

अथामूर्तम् । वायुश्चान्तरिक्षश्च । एतदमृतम् । एतद्यत् । एतत्त्यम् ।

तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषः ।

त्यस्य ह्येष रस । इत्यधिदैवतम् ॥ २.३.३ ॥

अथाध्यात्मम् ।

इदमेव मूर्तं यदन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाशः । एतन्मर्त्यम् । एतत्स्थितम् । एतत्सत् ।

तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः । सतो ह्येष रसः ॥ २.३.४ ॥

अथामूर्तं प्राणश्च यश्चायमन्तरात्मन्नाकाशः । एतदमृतम् । एतद्यत् । एतत्त्यत् ।

तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो योऽयं दक्षिणेऽक्षन्पुरुषः । त्यस्य ह्येष रसः ॥ २.३.५ ॥

तस्य हैतस्य पुरुषस्य रूपम् यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपो यथाग्न्यर्चिर्यथा पुण्डरीकं यथा सकृद्विद्युत्तम् ।

māhārajana – окрашенный шафраном;
pāṇḍva *n* – некрашенная шерстяная одежда;
indragopa *m* - кошениль; (из нее получается кармин, красная краска)
arcis *n, f* - пламя, луч;

सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेद ।

अथात आदेशो नेति नेति । न ह्येतस्मादिति नेत्यन्यत्परमस्ति ।

अथ नामधेयं सत्यस्य सत्यमिति । प्राणा वै सत्यम् । तेषामेष सत्यम् ॥ २.३.६ ॥

इति तृतीयं ब्राह्मणम् ॥ ३ ॥

मैत्रेयीति होवाच याज्ञवल्क्यः उद्यास्यन्वा अरेऽहमस्मात्स्थानादस्मि ।

maitreyī, yājñavalkya – *nom.pr.*;

हन्त तेऽनया कात्यायन्यान्तं करवाणीति ॥ २.४.१ ॥

kātyāyanī – *nom.pr.*;

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति ।

नेति होवाच याज्ञवल्क्यः ।

यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात् ।

upakaraṇavant – имеющий средства;

अमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ २.४.२ ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्याम् ।

यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ २.४.३ ॥

स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती प्रियं भाषसे ।

एह्यास्स्व । व्याख्यास्यामि ते । व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ २.४.४ ॥

ni√dhyā I P. – размышлять, сосредотачиваться; *des.* быть внимательным;

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति ।

न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति ।

न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति ।

न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति ।

न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति ।

न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति ।

न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति ।

न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति ।

न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति ।

न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति ।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि ।

आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् ॥ २.४.५ ॥

ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद ।

parā√dā III U. – оставлять на произвол судьбы; отдавать, жертвовать;

क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद ।

लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान्वेद ।

देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद ।

भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद ।

सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद ।

इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा ॥ २.४.६ ॥

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय ।

dundubhi *m* – барабан, литавры;

दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ २.४.७ ॥

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय

śaṅkha *m, n* - раковина;
√dham I P. - дуть, играть (на духовом инструменте);

शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ २.४.८ ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय

viṇā *f* – струнный музыкальный инструмент *вина*;

वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ २.४.९ ॥

स यथार्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येव वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः

सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि ।

ārdra - мокрый, сырой, влажный;
abhyā√dhā III U. - подкладывать дрова, разводить огонь;
atharvāṅgirasa *m* – гимны Атхарваведы;
anuvyākhyāna *n* - та часть брахманов (трактатов), которая объясняет или иллюстрирует сложные сутры, неясные утверждения, встречающееся в другой части;
vyākhyāna *n* - объяснение, интерпретация, комментарии;

अस्यैवैतानि निश्वसितानि ॥ २.४.१० ॥

स यथा सर्वासामपां समुद्र एकायनम् ।

ekāyana *n* - единственный путь, место встречи;

एवं सर्वेषां स्पर्शानां त्वगेकायनम् ।

एवं सर्वेषां गन्धानां नासिके एकायनम् ।

एवं सर्वेषां रसानां जिह्वैकायनम् ।

एवं सर्वेषां रूपाणां चक्षुरेकायनम् ।

एवं सर्वेषं शब्दानां श्रोत्रमेकायनम् ।

एवं सर्वेषां संकल्पानां मन एकायनम् ।

एवं सर्वासां विद्यानां हृदयमेकायनम् ।

एवं सर्वेषां कर्मणां हस्तावेकायनम् ।

एवं सर्वेषामानन्दानामुपस्थ एकायनम् ।

upastha *m, n* – половые органы

एवं सर्वेषां विसर्गाणां पायुरेकायनम् ।

pāyu *m* – анус;

एवं सर्वेषामध्वनां पादावेकायनम् ।

एवं सर्वेषां वेदानां वागेकायनम् ॥ २.४.११ ॥

स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायेव स्यात् ।

saindhavakhilya *m* – ком соли;
anuvi√lī I P. – растворяться в ч.-л. (+Acc.);

यतोयतस्त्वाददीत लवणम् ।

एवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एव ।

एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति ।

न प्रेत्य संज्ञास्तीत्यरे ब्रवीमि । इति होवाच याज्ञवल्क्यः ॥ २.४.१२ ॥

सा होवाच मैत्रेयी अत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञास्तीति ।

स होवाच न वा अरेऽहं मोहं ब्रवीमि ।

अलं वा अर इदं विज्ञानाय ॥ २.४.१३ ॥

यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति ।

dvaita *n* – двойственность;

यत्र वास्य सर्वमात्मैवाभूत्तत्केन कं जिघ्रेत्तत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कं शृणुयात्तत्केन कमभिवदेत्तत्केन कं मन्वीत तत्केन कं विजानीयात् ।

येनेदं सर्वं विजानाति तं केन विजानीयात् ।

विज्ञातारमरे केन विजानीयादिति ॥ २.४.१४ ॥

इति द्वितीयाध्यायस्य चतुर्थं ब्राह्मणम् ॥४॥

इयं पृथिवी सर्वेषां भूतानां मधु ।

अस्यै पृथिव्यै सर्वाणि भूतानि मधु ।

यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

adhyātma – принадлежащий самому себе; *n* – высший дух, мировая душа; Acc. adv. относительно себя или отдельной личности;

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.१ ॥

इमा आपः सर्वेषां भूतानां मधु ।

आसामपां सर्वाणि भूतानि मधु ।

यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं रैतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.२ ॥

अयमग्निः सर्वेषां भूतानां मधु ।

अस्याग्नेः सर्वाणि भूतानि मधु ।

यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्मयस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.३ ॥

अयं वायुः सर्वेषां भूतानां मधु ।

अस्य वायोः सर्वाणि भूतानि मधु ।

यश्चायमस्मिन् वायौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः पुरुषो यमेव स योऽयमात्मा ।

इदं अमृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.४ ॥

अयमादित्यः सर्वेषां भूतानां मधु ।

अस्यादित्यस्य सर्वाणि भूतानि मधु ।

यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.५ ॥

इमा दिशः सर्वेषां भूतानां मधु ।

आसां दिशां सर्वाणि भूतानि मधु ।

यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

pratiśrutkā *f* - эхо;

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.६ ॥

अयं चन्द्रः सर्वेषां भूतानां मध्व् ।

अस्य चन्द्रस्य सर्वाणि भूतानि मधु ।

यश्चायमस्मिंश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा

इदममृतम् इदं ब्रह्मेदं सर्वम् ॥ २.५.७ ॥

इयं विद्युत्सर्वेषां भूतानं मधु ।

अस्यै विद्युतः सर्वाणि भूतानि मधु ।

यश्चायमस्यां विद्युति तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.८ ॥

अयं स्तनयित्नुः सर्वेषां भुतानां मधु ।

stanayitnu *m* – гром;

अस्य स्तनयित्नोः सर्वाणि भूतानि मधु ।

यश्चायमस्मिन्स्तनयित्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शाब्दः सौवरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

sauvara - звуковой;

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.९ ॥

अयमाकाशः सर्वेषां भूतानां मधु ।

अस्याकाशस्य सर्वाणि भूतानि मधु ।

यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं हृद्याकाशस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.१० ॥

अयं धर्मः सर्वेषां भूतानां मधु ।

अस्य धर्मस्य सर्वाणि भूतानि मधु ।

यश्चायमस्मिन् धर्मे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं धार्मस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.११ ॥

इदं सत्यं सर्वेषां भूतानां मधु ।

अस्य सत्यस्य सर्वाणि भूतानि मधु ।

यश्चायमस्मिन् सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं सात्यस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.१२ ॥

इदं मानुषं सर्वेषां भूतानां मधु ।

mānuṣa *n* – человечество; *m* человек;

अस्य मानुषस्य सर्वाणि भूतानि मधु ।

यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.१३ ॥

अयमात्मा सर्वेषां भूतानां मधु ।

अस्यात्मनः सर्वाणि भूतानि मधु ।

यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा ।

इदममृतमिदं ब्रह्मेदं सर्वम् ॥ २.५.१४ ॥ ॥

स वा अयमात्मा सर्वेषामधिपतिः सर्वेषां भूतानां राजा ।

तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिताः ।

nābhi *m, f* – центр, пупок, ступица;
nemi *f* – обод колеса, круг;
ara *m* – спица колеса;
samarpita – размещенный, разкрепленный внутри;

एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ॥ २.५.१५ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत्

dadhyañc ātharvaṇa – *nom. pr.* имя риши, сына Атхарвана;

तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् ।

sani *m, f* - выигрыш, добыча, дар;
daṃsas *n* - чудесный подвиг; сила, мужество;
tanyatu *m* - гром;

दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाचेति ॥ २.५.१६ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत्

dadhyañc ātharvaṇa – *nom. pr.* имя риши, сына Атхарвана;

आथर्वणायाश्विनौ दधीचेऽश्व्यं शिरः प्रत्यैरयतम् ।

pratīr (prati√īr) *только caus.* – надеть, закрепить;

स वां मधु प्र वोचदृतायन् त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति ॥ २.५.१७ ॥

√ṛtāya *den.* – желать речи, соблюдать закон, желать жертвоприношения;
dasra – совершающий чудеса, оказывающий чудесную помощь; *m nom. pr.* имя одного из Ащвинов;
kakṣya – тайный, скрытый, секретный;

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच ।तदेतदृषिः पश्यन्नवोचत्

पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ।

पुरः स पक्षी भुत्वा पुरः पुरुष आविशदिति ।

स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः ।

pur *f* - крепость, город; тело;

नैनेन किं चनानावृतम् । नैनेन किं चनासंवृतम् ॥ २.५.१८ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत्

रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।

इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेति ।

अयं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च ।

तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम् ।

अयमात्मा ब्रह्म सर्वानुभूः । इत्यनुशासनम् ॥ २.५.१९ ॥

anubhū – одолевающий; чувствующий, вопринимающий;

॥ इति पञ्चमं ब्राह्मणम् ॥

अथ वंशः। पौतिमाष्यो गौपवनात् । गौपवनः पशुतिमाष्यात् । पशुतिमाष्यो गौपवनात् । गौपवनः कौशिकात् ।

कौशिकः कौण्डिन्यात् । कौण्डिन्यः शाण्डिल्यात् । शाण्डिल्यः कौशिकाच्च गौतमाच्च । गौतमः ॥ २.६.१ ॥

आग्निवेश्यात् । आग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्च । आनभिम्लात आनभिम्लातात् । आनभिम्लात आनभिम्लातात् ।

आनभिम्लातो गौतमात् । गौतमः सैतवप्राचीनयोग्याभ्याम् । सैतवप्राचीनयोग्यौ पाराशर्यात् । पाराशर्यो भारद्वाजात् ।

भारद्वाजो भारद्वाजाच्च गौतमाच्च । गौतमो भारद्वाजात् । भारद्वाजः पाराशर्यात् । पाराशर्यो वैजवापायनात् ।

वैजवापायनः कौशिकायनेः । कौशिकायनिः ॥ २.६.२ ॥

घृतकौशिकात् । घृतकौशिकः प्राशर्यायणात् । पारशर्यायणः पाराशर्यात् । पाराशर्यो जातूकर्ण्यात् ।

जातूकर्ण्य आसुरायणाच्च यास्काच्च । आसुरायणस्त्रैवणेः । त्रैवणिरौपजन्धनेः । औपजन्धनिरासुरेः ।

आसुरिर्भारद्वाजात् । भारद्वाज आत्रेयात् । आत्रेयो माण्टेः । माण्टिर्गौतमात् । गौतमो वात्स्यात् ।

वात्स्यः शाण्डिल्यात् । शाण्डिल्यः कैशोर्यात्काप्यात् । कैशोर्यः काप्यः कुमारहारितात् । कुमारहारितो गालवात् ।

गालवो विदर्भीकौण्डिन्यात् । विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवात् । वत्सनपाद्बाभ्रवः पथः सौभरात् ।

पन्थाः सौभरोऽयास्यादाङ्गिरसात् । अयास्य आङ्गिरस आभूतेस्त्वाष्ट्रात् । आभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्रात् ।

विश्वरूपस्त्वाष्ट्रोऽश्विभ्याम् । अश्विनौ दधीच आथर्वणात् । दध्यङ्ङाथर्वणोऽथर्वणो दैवात् । अथर्वा दैवो मृत्योः प्राध्वंसनात् ।

मृत्युः प्राध्वंसनः प्रध्वंसनात् । प्रध्वंसन एकर्षेः । एकर्षिर्विप्रचित्तेः । विप्रचित्तिर्व्यष्टेर् । व्यष्टिः सनारोः ।

सनारुः सनातनात् । सनातनः सनगात् । सनगः परमेष्ठिनः । परमेष्ठी ब्रह्मणः । ब्रह्म स्वयंभु । ब्रह्मणे नमः ॥ २.६.३ ॥

इति षष्ठं ब्राह्मणम् ॥